युगलमन्त्रः, पुं, (युगलाख्यो मन्त्रः। शाकपार्थिववत् समासः।) लक्ष्मीनारायणमन्त्रः। यथा,—
"इदं रहस्यं परमं लक्ष्मीनारायणाह्वयम्।
राजंस्तवापि वक्ष्यामि प्रपत्तिं शरणागतिम्॥
इयात् परतरो मन्त्रो नास्ति सत्यं ब्रवीमि ते।
इयात् परतरो धर्म्मो नास्ति लोकेषु कश्चन॥
सर्व्वेषां कृष्णमन्त्राणां मध्ये युगलसंज्ञकम्।
मन्त्रं हि सर्व्वतः श्रेष्ठं कृष्णजप्यमनुत्तमम्॥
सर्व्वतो युगलं मन्त्रं कार्य्यं परतरं नृप!।
गुह्याद्गुह्यतमं जातु न्नेयं तत्तदुपासकैः॥"
इति पाद्मोत्तरखण्डे २५ अध्यायः॥

युगलाख्यः, पुं, (युगलमित्याख्या यस्य।) वव्वूँरवृक्षः। इति राजनिर्घण्टः॥ त्रि, युग्मनामकः॥

युगांशकः, पुं, (युगस्य अंशकः क्षुद्रांशः इति।) वत्सरः। इति हारावली।२८॥ युगविभाजकस्य॥

युगाद्या, स्त्री, (युगस्याद्यादिभूता।) युगारम्भतिथिः। यथा। "अथ युगाद्याः। तासु च।
'युगाद्या वर्षवृद्धिश्च सप्तमी पार्व्वतीप्रिया।
रवेरुदयमीचन्ते न तत्र तिथियुग्मता॥'
इत्यनेन व्यवस्था॥
ब्रह्मपुराणे।
'वैशाखे शुक्लपक्षे तु तृतीयायां कृतं युगम्।
कार्त्तिके शुक्लपक्षे तु त्रेताथ नवमेऽहनि॥
अथ भाद्रपदे कृष्णत्रयोदश्यान्तु द्वापरम्।
माघे च पौर्णमास्यां वै घोरं कलियुगं स्मृतम्॥
युगारम्भास्तु तिथयो युगाद्यास्तेन विश्रुताः॥'
अत्र वैशाखादयः पौर्णमास्यन्ता एव। ब्रह्मपुराणे तथैव तिथिकृत्याभिधानात्। मुख्यवाचित्वे कार्त्तिके नवमेऽहनीत्यनेनैवेष्टसिद्धौ शुक्लपक्ष इति व्यर्थं स्यात्। तेन भाद्रकृष्णत्रयोदशी अश्वयुक्कृष्णपक्षीयेति मैथिलोक्तं निरस्तम्॥*॥ आसां प्रशंसामाह विष्णुपुराणम्।
'वैशाखमासस्य सिता तृतीया
नवम्यसौ कार्त्तिकशुक्लपक्षे।
नभस्यमासस्य तमिस्रपक्षे
त्रयोदशी पञ्चदशी च माघे॥
एता युगाद्याः कथिताः पुराणै-
रनन्तपुण्यास्तिथयश्चतस्रः।
उपप्लवे चन्द्रमसो रवेश्च
त्रिष्वष्टकास्वप्ययनद्वये च॥'
उपप्लवे ग्रहणे।
'पानीयमप्यत्र तिलैर्व्विमिश्रं
दद्यात् पितृभ्यः प्रयतो मनुष्यः।
श्राद्धं कृतं तेन समाः सहस्रं
रहस्यमेतत् पितरो वदन्ति॥'
स्नानमधिकृत्य भविष्ये।
संवत्सरफलं तत्र नवम्यां कार्त्तिके तथा।
मन्वादौ च युगादौ च मासत्रयफलं लभेत्॥"
इति तिथ्यादितत्त्वम्॥

युगान्तः, पुं, (युगानामन्तो यत्र। युगानामन्तो वा।) प्रलयः। इति हलायुधः॥ (यथा, महाभारते।५।४८।६५।
"उद्वर्त्तयन् दस्युसंघान् समेतान्
प्रवर्त्तयन् युगमन्यद्युगान्ते।
यदा धक्ष्यत्यग्निवत् कौरवेयां-
स्तदा तप्ता धार्त्तराष्ट्रः सपुत्त्रः॥)
युगशेषश्च॥

युग्मं, क्ली, (युज्यते इति। युज्+"युजिरुचितिजां कुश्च।" उणा० १।१४५। इति मक्।) द्वयम्। योड़ा इति भाषा। तत्पर्य्यायः। द्वन्द्वम् २ युगलम् ३ युगम् ४। इत्यमरः।२।५।३८॥ (यथा, रामायणे।२।६१।७६।
"पादुकोपानहाश्चैव युगान्यत्र सहस्रशः॥")
द्वितीयचतुर्थषष्ठाष्टमदशमद्वादशराशयः। यथा
"क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च
ओजोऽथ युग्मं विषमः समश्च।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः॥"
इति ज्योतिस्तत्त्वम्॥
(द्वितीया।) मेलनम्। यथा,—
"युग्माग्निकृतभूतानि षण्मुन्योर्व्वसुरन्ध्रयोः।
रुद्रेण द्वादशी युक्ता चतुर्द्दश्याथ पूर्णिमा॥
प्रतिपद्याप्यमावास्या तिथ्योर्युग्मं महाफलम्।
एतद्व्यस्तं महाघोरं हन्ति पुण्यं पुराकृतम्॥
द्वितीयातृतीययोश्चतुर्थीपञ्चम्योः षष्ठीसप्तम्योरष्टमीनवम्योरेकादशीद्वादश्योः चतुर्द्दशीपौर्णमास्योः प्रतिपदमावास्ययोर्युग्मं मेलनम्। तत्तत्तिथिमात्रनिमित्तके कर्म्मणि महाफलम्। एतत् प्रयोजनन्तु तिथिविशेषविहिते कर्म्मणि तिथिखण्डविशेषनियमनम्। स्वतिथ्या कर्म्मानिर्व्वाहे सहायभावेनान्यतिथ्यनुप्रवेशादुपवासाद्याचरणञ्च।" इति तिथ्यादितत्त्वम्॥ (द्वयविशिष्टे, त्रि। यथा, मनुः।३।४८।
"युग्मासु पुत्त्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु।
तस्मात् युग्मासु पुत्त्रार्थी संविशेदार्त्तवे स्त्रियम्॥")

युग्मपत्रः, पुं, (युग्मं पत्रमस्य।) रक्तकाञ्चनवृक्षः। इति रत्नमाला॥ (युग्मं पत्रम्।) युगलपर्णे, क्ली॥

युग्मपत्रिका, स्त्री, (युग्मं पत्रमस्याः। "शेषाद्विभाषा।" ५।४।१५४। इति कप्। टापि अत इत्वम्।) शिंशपावृक्षः। इति शब्दरत्नावली॥ (विवृतिरस्याः शिंशपाशब्दे ज्ञातव्या॥)

युग्मपर्णः पुं, (युग्मं पर्णमस्य।) कोविदारवृक्षः। सप्तपर्णवृक्षः। इति राजनिर्घण्टः॥

युग्मफला, स्त्री, (युग्मं फलमस्याः।) इन्द्रचिर्भिटी। वृश्चिकाली। इति राजनिर्घण्टः॥ शल्लिका। इति रत्नमाला॥

युग्मादरः, पुं, (युग्मस्यादरः।) तिथिविशेषयोगेन तिथिखण्डविशेषस्यादरणम्। यथा। "पञ्चमी सप्तमी चैवेत्यादिना विशेषतः सायाह्नव्यापितिथेर्ग्रहणादुपवासेऽपि न रात्रियुग्मादरः।" इति तिथ्यादितत्त्वम्॥ अस्य विवरणं युग्मशब्दे द्रष्टव्यम्॥

युग्मादरणं, क्ली, (युग्मस्यादरणम्।) युग्मतिथिपूज्यता। यथा,—
"त्रिसन्ध्यव्यापिनी या तु सैव पूज्या सदा तिथिः।
न तत्र युग्मादरणमन्यत्र हरिवासरात्॥"
इति तिथ्यादितत्त्वम्॥

युग्यं, क्ली, (युगाय हितम्। युग+"उगवादिभ्यो यत्।" ५।१।२। इति यत्। युगमर्हतीति वा। दण्डादित्वात् यत्। यद्वा, युज्यत इति। युज्+"युग्यं च पत्रे।" ३।१।१२१। इति क्यबन्तो निपातितः।) वाहनम्। यानम्। इत्यमरः।२।८।५८॥ (यथा, महाभारते।३।५६।६।
"हिरण्यस्य सुवर्णस्य यानयुग्यस्य वाससाम्।
आविष्टः कलिना द्यूते जीयते स्म नलस्तदा॥"
यथा च मनौ।८।२९३।
"यत्रापवर्त्तते युग्यं वैगुण्यात् प्राजकस्य तु।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमम्॥"
वाच्यलिङ्गेऽपि दृश्यते। यथा, "युग्यो गौः। युग्योऽश्वः। युग्यो हस्ती।" इति काशिका।३।१।१२१॥)

युग्यः, पुं, (युगं वहतीति। युग+"तद्वहति रथयुगप्रासङ्गम्।" ४।४।७६। इति यत्प्रत्ययः।) युगवोढ़ा। इत्यमरः।२।८।६४॥ ("रथं वहतीति रथ्यः युग्यः प्रासङ्ग्यः।" इति काशिका॥)

युङ् [ज्] त्रि, (युजिर् योगे+क्विन्। "युजेरसमासे।" ७।१।७१। इति नुमागमः।) योगकर्त्ता। मेलनकर्त्ता। इति मुग्धबोधव्याकरणम्॥ (यथा, भट्टिकाव्ये।६।११८।
"गुहाया निरगाद्वाली सिंहो मृगमिव द्रावन्।
भ्रातरं युङ्भियः संख्ये घोषेणापूरयन्दिशः॥"
युग्मम्। यथा, मनौ।३।२७७।
"युक्षु कुर्व्वन् दिनर्क्षेषु सर्व्वान् कामान् समश्नुते।
अयुक्षु तु पितॄन् सर्व्वान् प्रजां प्राप्नोति पुष्कलाम्॥"
समः। स च छन्दसि द्वितीयचतुर्थपादरूपः। यथा, छन्दोमञ्जर्य्याम्।३।१।
"विषमे यदि सौ सलगा दले
भौ युजि भाद्गुरुकावुपचित्रम्॥")

युङ्गी, [न्] पुं, वर्णसङ्करजातिविशेषः। स तु गङ्गापुत्त्रकन्यायां वेशधारिणो जातः। यथा,—
"गङ्गापुत्त्रस्य कन्यायां वीर्य्येण वेशधारिणः।
बभूव वेशधारी च पुत्त्रो युङ्गी प्रकीर्त्तितः॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम्॥

युच्छ, प्रमादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) अन्तःस्थाद्यादिः पञ्चमस्वरी। प्रमादोऽनवधानता। युच्छति पापे साधुः। ओष्ठ्यवर्गाद्यादिरिति रमानाथः। पचादित्वादनि पुच्छो लाङ्गूलम्। ओष्ठ्यवर्गशेषादिरिति त्रिलोचनः। मुच्छति। इति दुर्गादासः॥

युज, इर् ध ञ औ युतौ। इति कविकल्पद्रुमः॥ (रुधा०-उभ०-सक०-अनिट्।) इर्, अयुजत् अयौक्षीत्। ध, युनक्ति युङ्क्ते इत्येतावान् लोकः। औ, योक्ता। इति दुर्गादासः॥